"पृष्ठतोऽनुययौ यान्तं वरदं वृषभध्वजम्। जृम्भकैर्यक्षरक्षोभिः स्रग्विभिः समलङ्कृतैः। यात्यमोघो महायक्षो दक्षिणं पक्षमाश्रितः" भा० व० २३०अ०। जृम्भयति जृम्भि–ण्वुल्। २कृशाश्वमुनितनये ४तदधिष्ठिते अस्त्रभेदे च "कृशाश्वतनयरूपाण्यस्त्राणि विश्वामित्रेण रामाय दत्तानि तत्कथा रामा० बा० २८अ०।

"संहारान् व्याजहाराथ धृतिमान् सुव्रतः शुचिः। सत्यवन्तं सत्यकीर्त्तिं धृष्टं रभसमेव च। प्रतिहारतरं नाम पराङ्मुखमवाङ्मुखम्। लक्ष्यालक्ष्याविमौ चैव दृढनाभसुनाभकौ। दशाक्षशतवक्त्रौ च दशशीर्षशतोदरौ। पद्मनाभौ महानाभौ दुन्दुनाभस्वनाभकौ। ज्योतिषं शकुनञ्चैव नैरास्यविमलावुभौ। यौगन्धरविनिद्रौ च दैत्यप्रमथनौ तथा। शुचिबाहुर्महाबाहुर्निष्कलिर्विरुचस्तथा। सार्चिमाली धृतिमाली वृत्तिमान् रुचिरस्तथा। पित्र्यः सौमनसश्चैव विधूतमकरावुभौ। करवीरं रतिश्चैव धनधान्यौ च राघव!। कामरूपं कामरुचिं मोहमावरणं तथा। जृम्भकं सर्पनाथं च पन्थानवरुणौ तथा। कृशाश्वतनयान् राम! भास्वरान् कामरूपिणः। प्रतीच्छ मम भद्रन्ते पात्रभूतोऽसि राघव!। बाढमित्येव काकुत्स्थः प्रहृष्टेनान्तरात्मना। दिव्यभास्वरदेहाश्च मूर्त्तिमन्तः सुखप्रदाः। केचिदङ्गारसदृशाः केचिद्धूमोपमास्तथा। चन्द्रार्कसदृशाः केचित् प्रह्वाञ्जलिपुटास्तथा। रामं प्राञ्जलयो भूत्वाऽब्रुवन् मधुरभाषिणः। इमे स्म नरशार्दूल! शाधि किङ्करवाम ते। गम्यतामिति तानाह यथेष्टं रघुनन्दनः। मनसा कार्यकालेषु साहाय्यं मे करिष्यथ। अथ ते राममामन्त्र्य कृत्वा चापि प्रदक्षिणम्। एवमस्त्विति काकुत्स्थ मुक्त्वा जग्मुर्यथागतम्" २८अ०। स्वार्थे क अत इत्त्वम्। ४जृम्भायां स्त्री(हाइतोला)सा च इन्द्रवृत्रयोर्युद्धे इन्द्रे वृत्रग्रस्ते देवैः सृष्टा ततः प्रभृति लोकप्राणवायुसंस्था यथाह भा०उ० ८अ० "ततो जग्राह देवेन्द्रं वृत्रो वीरः शतक्रतुम्। अपावृत्याक्षिपद्वक्त्रे शक्रं कोपसमन्वितः। ग्रस्ते वृत्रेण शक्रे तु सम्भ्रान्तास्त्रिदिवेश्वराः। असृजंस्ते महासत्त्वा जृम्भिकां वृत्रनाशिनीम्। विजृम्भमाणस्य ततो वृत्रस्यास्यादपावृतात्। स्वान्यङ्गान्यभिसङ्क्षिप्य निष्क्रान्तो बलनाशनः। ततः प्रभृति लोकस्य जृम्भिका प्राणसंश्रिता"।

**जृम्भण** न० जृभि–भावे ल्युट्। (हाइतोला) १गात्रशैथिल्यापादके २मुखविकाशकारके च व्यापारभेदे। "मुहुर्मुहुर्जृम्भणतत्पराणि–"अङ्गान्यनङ्गः प्रमदाजनस्य करोति लावण्यरसोत्सुकानि" ऋतुसं० "जगृहुस्तद्विसृष्टां तां जृम्भणाख्यां तनुं प्रभोः" भाग०३।२०।४२। जृभि–णिच्–ल्यु। २जृम्भणकारिणि ३जृम्भकास्त्रे च "जृम्भणं नाम सोऽप्यस्त्रं जग्राह पुरुषोत्तमः। हरं स जृम्भयामास क्षिप्रकारी महाबलः" हरिवं०१८४ अ०। "जृम्भणं पातनञ्चैव त्वाष्ट्रञ्चापि सुदारुणम्" २३४ अ०।

**जृम्भिणी** स्त्री जृभि–णिनि। एलापर्ण्याम् शब्दच०।

**जृम्भित** त्रि०जृभि–क्त।१चेष्टिते२प्रवृद्धे च भावे क्त।३जृम्भायां ४स्फुटने हेमच० स्त्रीणां ५करणभेदे न० मेदि०।

**जॄ** जरायां दिवा० पर० अक० सेट् जीर्य्यति इरित्। अजरत् अजारीत्। जीर्णः। षित्। जरा। घटादि०। जरयति। "या न जीर्य्यति जीर्य्यतः"नीतिमा०जीर्य्यते रत्न्। जरन्। जजार। जरीता जीर्णः। "जरितॄणां सतां भुवः स्तुतये" वामदेव्यगानमन्त्रः।

**जॄ** जरायां वा चुरा० उभ० पक्षे क्र्यादि०प्वादि० अक० सेट्। घटा०। जरयति ते अजीजरत् त। जृणाति। इरित् अजरत्-अजारीत्।

**जेतृ** त्रि० जि–तृच्। जयशीले। "जेता नृभिः इन्द्रः पृत्सु" ऋ० १।१७८।३। "जेतारं लोकपालानां स्वमुखैरर्चितेश्वरम्" रघुः। स्त्रियां ङीप्। २विष्णौ पु०। "अनघो विजयो जेता" विष्णुस०। जयत्यतिशेते सर्वभूतानि" इति जेता" भा०।

**जेतव्य** त्रि०जि–कर्मणि तव्य। जेये "जय्यो यः शक्यते जेतुं जेयो जेतव्यमात्रके" अमरः।

**जेत्व** त्रि० जि–त्वनिप् वेदे नि० दीर्घस्यापि लुक्। जेतव्ये। "अस्यामाते जयतु जेत्वानि"ऋ०।४७।२६। "जेत्वानि जेतव्यानि" भा०।

**जेन्ताक** न०स्वेदसेवनार्थं गृहभेदे ( भापरालओयार घर) तन्निर्मितिप्रकारोऽभिहितश्चरके यथा

"अथ जेन्ताकं चिकीर्षुर्भूमिं परीक्षेत। तत्र पूर्वस्यां दिश्युत्तरस्यां वा गुणवति प्रशस्ते भूमिभागे कृष्णमृत्तिके सुवर्णमृत्तिके वा परीवापपुष्करिण्यादीनां जलाशयानामन्यतमस्य कूले दक्षिणे पश्चिमे वा सूपतीर्थे समसुविभक्ते भूमिभागे सप्ताष्टौ वा अरत्नीनुपक्रम्योदकात् प्राङ्मुखमुदङ्मुखं वाभिमुखतीर्थं कूटागारं कारयेत्। उत्सेधविस्तारतः परमरत्नीः षोडश समन्तात् सुवृत्तं मृत्-